

मराठी

# श्री रामरक्षा स्तोत्रम्

InstaPDF
INSTAPDF.IN

जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम

# || श्री रामरक्षास्तोत्रम् ||

## || अथ ध्यानम ||

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं, पीतं वासो वसानं नवकमल दलस्पर्धिनेत्रं प्रसन्नम् ।
वामांकारूढ़सीतामुखकमलमिलल्लोचनं नीरदाभं नानालंकारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ।

## || स्तोत्रम ||

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् । एकैकमक्षरं पुंसां महापातकनाशनम् ।।1।।
ध्यात्वा नीलोत्पलश्याम रामं राजीवलोचनम । जानकी लक्ष्मणोपेतं जटामुकुटमण्डितम ।।2।।
सासितूण – धनुर्बाणपाणिं नक्तंचरान्तकम । स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम ।।3।।
रामरक्षां पठेत प्राज्ञ: पापघ्नीं सर्वकामदाम । शिरो में राघवं पातु भालं दशरथात्मज: ।।4।।
कौसल्येयो दृशौ पातु विश्वामित्रप्रिय: श्रुती । घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सल: ।।5।।

INSTAPDF.IN

जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम

• जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम •

जिव्हां विद्यानिधि पातु कण्ठं भरतवन्दित: । स्कन्धौ दिव्यायुध: पातु भुजौ भग्नेशकार्मुक: ।।6।।

करौ सीतापति: पातु हृदयं जामदग्न्यजित । मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रय: ।।7।।

सुग्रीवेश: कटी पातु सक्थिनी हनुत्मप्रभु: । ऊरू रघूत्तम: पातु रक्ष:कुलविनाशकृत ।।8।।

जानुनी सेतकृत्पातु जंघे दशमुखान्तक: । पादौ विभीषणश्रीद: पातु रामोऽखिलं वपु: ।।9।।

एतां रामबलोपेतां रक्षां य: सुकृती पठेत । स चिरायु: सुखी पुत्री विजयी विनयी भवेत ।।10।।

पातालभूतलव्योमचारिण श्छद्मचारिण: । न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभि: ।।11।।

रामेति रामभद्रेति रामचन्द्रेति वा स्मरन । नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति ।।12।।

जगज्जैत्रैकमन्त्रेण रामनाम्नाभिरक्षितम । य: कण्ठे धारयेत्तस्य करस्था: सर्वसिद्धय: ।।13।।

वज्रपंजरनामेदं यो रामकवचं स्मरेत । अव्याहताज्ञ: सर्वत्र लभते जयमंगलम ।।14।।

आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हर: । तथा लिखितवान्प्रात: प्रबुद्धो बुधकौशिक: ।।15।।

आराम: कल्पवृक्षाणां विराम: सकलापदाम । अभिरामस्त्रिलोकानां राम: श्रीमान्स न: प्रभु: ।।16।।

तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ । पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ।।17।।

फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ । पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ।।18।।

शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम । रक्ष: कुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ।।19।।

आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषंगसंगिनौ । रक्षणाय मम रामलक्ष्मणावग्रत: पथि सदैव गच्छताम ।।20।।

INSTAPDF.IN

• जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम •

सन्नद्धः कवची खड्गी चापबाणधरो युवा । गच्छन्मनोरथान्नश्च रामः पातु सलक्ष्मणः ।।21।।
रामो दाशरथिः शूरो लक्ष्मणानुचरो बली । काकुत्स्थः पुरुषः पूर्णः कौसल्लेयो रघूत्तमः ।।22।।
वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः । जानकीवल्ल्भः श्रीमानप्रमेयपराक्रमः ।।23।।
इत्येतानि जपन्नित्यं मद्भक्तः श्रद्धयान्वितः । अश्वमेधाधिकं पुण्यं सम्प्राप्नोति न संशयः ।।24।।
रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम । स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नराः ।।25।।
रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुंदरं । काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम ।।26।।
राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्ति । वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम ।।27।।
रामाय रामभद्राय रामचन्द्राय वेधसे । रघुनाथय नाथाय सीतायाः पतये नमः ।।28।।
श्रीराम राम रघुनन्दन राम राम श्रीराम राम भरताग्रज राम राम । श्रीराम राम रणकर्कश राम राम श्रीराम राम शरणं भव राम राम ।।29।।
श्रीरामचन्द्रचरणौ मनसा स्मरामि श्रीरामचन्द्रवरणौ वचसा गृणामि । श्रीरामचन्द्रचरणौ शिरसा नमामि श्रीरामचन्द्रचरणौ शरणं प्रपद्ये ।।30।।
माता रामो मत्पिता रामचन्द्रः स्वामी रामो मत्सखा रामचन्द्रः । सर्वस्वं मे रामचन्द्रो दयालुर्नान्यं जाने नैव जाने न जाने ।।31।।
दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा । पुरतो मारुतिर्यस्य तं वन्दे रघुनंदनम ।।32।।
लोकाभिरामं रणरंगधीरं राजीवनेत्रं रघुवंशनाथम । कारुण्यरुपं करुणाकरं तं श्रीरामचन्द्रं शरणं प्रपद्ये ।।33।।
मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम । वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ।।34।।
कूजन्तं रामरामेति मधुरं मधुराक्षरम । आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम ।।35।।
आपदामपहर्तारं दातारं सर्वसम्पदाम । लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम ।।36।।

• जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम •

भर्जनं भवबीजानामर्जनं सुखसम्पदाम । तर्जनं यमदूतानां रामरामेति गर्जनम ।।37।।
रामो राजमणि: सदा विजयते रामं रमेशं भजे, रामेणाभिहता निशाचरचमू, रामाय तस्मै नम: ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं, रामे चित्तलय: सदा भवतु मे भो राम मामुद्धर ।।38।।
राम रामेति रामेति रमे रामे मनोरमे । सहस्त्र नाम तत्तुल्यं रामनाम वरानने ।।39।।

InstaPDF
INSTAPDF.IN
Hi! We're InstaPDF. A dedicated portal where one can download any kind of PDF files for free, **with just a single click**.
https://instapdf.in

• जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम • जय श्री राम •